उन्नाम:-प्रणाम:, नाम:, नम:-नाम:-प्रणम:, निनंस:, नंनम: ;
नन्तुम्, नमयितुम्-नामयितुम्-प्रणमयितुम्, निनंसितुम्, नंनमितुम् ;
नति:, नमना-नामना-प्रणमना, निनंसा, नंनमा ;
नमनम्, नृनमनम्, नमनम्-नामनम्-प्रणमनम्, निनंसनम्, नंनमनम् ;
नत्वा, नमयित्वा-नामयित्वा, निनंसित्वा, नंनमित्वा ;
[1]प्रणत्य-प्रणम्य, [2]प्रणमय्य, प्रणिनंस्य, प्रणंनम्य ;
नामम् २, } [3]नमम् २-नामम् २-नामम् २-प्रणमम् २-प्रणामम् २, }
नत्वा २, } नमयित्वा २-नामयित्वा २, }
निनंसम् २, } नंनमम् २ ; }
निनंसित्वा २, } नंनमित्वा २. }

(665) **"णय गतौ"** (I-भ्वादि:-480. सक. सेट्. आत्म.)
'--रक्षणे च' इति मैत्रेय: । क्षीरस्वामी तु 'नय--' इति पपाठ ।
स पाठश्चिन्त्य: । सर्वत्र णोपदेशेनैवोपलम्भात् ।

नायक:-यिका, नायक:-यिका, निनयिषक:-षिका, नानयक:-यिका ;
[A]नयित:, [4]प्रणयमान:, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचयतिवत् (502) ज्ञेयानि ।

(666) **"णल गन्धे"** (I-भ्वादि:-838. अक. सेट्. पर.) ज्वलादि: ।
'—बन्धने' इति काश्यप: । गन्ध:=हिंसनं वासना च ।
नालक:-लिका, प्रणालक:-लिका, निनलिषक:-षिका, नानलक:-लिका ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचलतिवत् (510) ज्ञेयानि । घटादि-

---

1. 'वा ल्यपि' (6-4-38) इति अनुनासिकलोपविकल्प: । अनुनासिकलोपपक्षे 'ह्रस्वस्य पिति—' (6-1-71) इति तुक् ।
2. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेश: ।
3. 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (6-4-93) इति णमुल्परे णौ दीर्घविकल्प: ।
4. 'उपसर्गादसमासेऽपि णोपदेशस्य' (8-4-14) इति णत्वम् ।

A. 'प्रतय्य किञ्चिन्नयितो गृहान्तिकं ददर्श धन्य: स दयालुमीश्वरम् ।' धा. का. 1.62.